श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीवरदभवस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवरदभवस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

सूर्यो विधिर्विधुविभूषितमस्तको वा
सर्वेऽपि तेऽदितिसुता भगवंस्त्वमेव।
तस्मादयं हि वरुणस्त्वयि देवदेवे
सिंहं गते वरदनाम्नि हरौ ववर्ष॥ 1॥

आरुह्य हंसमत एव भवान् करीश !
वीथीषु विश्वजनतानयनोत्सवानाम्।
स्रष्टाऽभवत्तदियमत्र सरस्वती च
दाक्षिण्यतो वहति मय्यपि सन्नतेऽस्मिन्॥ 2॥

ध्येयस्सदा सवितृमण्डलमध्यवर्ती
सन्ध्यां विधाय भगवानिति शास्त्रमस्तु।
सेव्यस्सदा सवितृमण्डलमध्यवर्ती
सन्ध्यां विधाय भगवानिति चात्र दृष्टम्॥ 3॥

सुमेरुगिरिसन्निभे सुभगपक्षयुग्मान्विते
सुवर्णमयविग्रहे श्रुतितनौ सुपर्णे स्थितः।
महेन्द्रमणिशैलवन्महितचक्रमुख्यान्वितः
मनोरथगणान् विभुः मम विभाति सम्पूरयन्॥ 4॥

हस्तिना च कमठेन तुन्दिले
हस्तिना त्वरितमाहृतः पुमान्।

sampradaya sundari kidambi sundar.kidambi.com

हस्तिनापुरजपाण्डुजप्रियो
हस्तिशैलदयितो विराजते ॥ 5 ॥

मारुतेरुपरि चार ते पदं
मेरुशृङ्गगतसूरसम्पदम्।
निन्दतीव किल सत्यमुच्यते
येन भानुरपि नैव दृश्यते ॥ 6 ॥

अशेषलोकानपि सर्वशेषिन् !
अहो विधातुं किल शेषभूतान्।
आरुह्य शेषं विहृतिं तनोषि
वीथीषु सर्वास्वविशेषकान्तिः ॥ 7 ॥

सूर्यप्रभेति दिनमित्यवगम्य देव्यौ
नैव स्थितिं सह तदा भवता प्रपन्ने।
चन्द्रप्रभेति रजनीत्यवगम्य किन्तु
साकं स्थितिं भगवता भवता प्रपन्ने ॥ 8 ॥

अनिमिषमखिलं नेत्रं गगने नन्तुं च सञ्चरति।
उचितमथामृतदानं कर्तुं हि करीश ! मोहिनीरूप ! ॥ 9 ॥

स्त्रीवेषं समुपागते भगवति श्रीदेवराजे कथं
श्रीः स्त्रीस्तुष्टमना भुजान्तरगता माता हि सा यत्ततः।
अस्त्री सन्नयमाततान हि वधं देवद्विषां पापिनां
सस्त्री सन्नधुना ततोऽपि महतीं कुर्याद्धि रक्षामिति ॥ 10 ॥

वीथीषु केलीर्विविधा विधाय
यालिं समारुह्य जनौघमध्ये।
आयान्तमम्भोरुहपत्रनेत्र -
मास्वादयन्तो वयमेव धन्याः ॥ 11 ॥

गानं रूपमथो विभूषणकुलं बर्हं च मौलौ स्थितं
दृष्ट्वा नन्दथुपीनदेहनिवहाः सर्वाः स्त्रियोऽपि ध्रुवम्।
ताभ्यस्सम्पतिताः किलात्र विषये काञ्च्यस्ततः काञ्च्यसौ
कीर्त्याऽभून्नगरी कथन्नु परथा संज्ञा भवेत् साम्प्रतम्॥ 12॥

मनो मम हृतं त्वया वरद ! वेणुगोपात्मना
मतिश्च मम मोहिता भवति नायके गायके।
इयं च कविता रता त्वयि कलापमौलौ कला
परत्र विरता परं कृतिरियं समाप्ता ततः॥ 13॥

॥ इति श्रीवरदभवस्तवः समाप्तः॥

sunder kidambi prapatti dot com sunder kidāmbi